M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1193

Title: Tulsi Stotra

1193

complete

C	Tulasi Stotra (Garuda Purana)		Title
			Author
			Editor
			Year, Vols.
SK			Publisher
1193			Remarks

अथतुलसीस्तोत्रं पापानियानिरविसनुपदस्थितानिब्रह्मघ्नबालपितृमातृवधस्थिता
निनश्यंतितानितुलसीवनदर्शनेनगोकोटिदानसदृशंफलमाप्नुवंति पुष्कराद्यानितीर्था
निगंगाद्याःसरितस्तथा वासुदेवाद्योदेवावसंतितुलसीवने २ तुलसीकाननंयत्रयत्रपद्म
वनानिचवसंतिवैष्णवायत्रतत्रसन्निहितोहरिः ३ यन्मूलेसर्वतीर्थानियन्मध्येसर्वदेवताः
यदग्रेवेदशास्त्राणितुलसींतांनमाम्यहं ४ तुलसीगंधमाघ्रायपितरस्तुष्टमानसः प्रयांतिग
रुडारूढास्तत्पदंचक्रपाणिनः ५ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां तुलसीदहते
पापंवाङ्मनःकायसंचितं ६ अमृतेसर्वकल्याणिशोकसंतापनाशिनी आधिव्याधिहरान्नृ
णांतुलसींतांनमाम्यहं ७ आम्रारोपसहस्राणिपिप्पलानांशतानिच तत्फलंसममेके
नतुलसीविटपेनतु ८ राजद्वारेसभामध्येसंग्रामेशत्रुपीडने ।तुलसीस्मरणंकुर्यात्सर्वत्रवि
जयीभवेत् ९ तुलस्यमृतनामासिसदात्वंकेशवप्रिये केशवार्थंविचिन्वामिवरदाभवशो
भने १० कृष्णारोपितथापुण्येविवाहेचार्थसंग्रहे ततःकार्यविसिध्यर्थप्रस्थानेतुलसीस्मरेत् ११ यःस्मरे
त्तुलसींसीतांरामंसौमित्रिणासह साजितारिगणान्सर्वान्पुनरागमनायच १२ याद्दृष्टानिखिला
घसंघशमनीस्पृष्टावपुःपावनीरोगाणामभिवंदितानिरसिनीसिक्तांतकत्रासिनी प्रत्यासत्तिवि
धायिनीभगवतःकृष्णस्यसंरोपितान्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः इतिगरुडपुराणेतु
लसीस्तोत्रंसंपूर्णं तुलस्यार्पितमस्तु